# १०. पादुका सहस्रम् - शृङ्गार पद्धतिः (१०)

शौरेः शृङ्गार चेष्टानां प्रसूतिं पादुकां भजे ।
यामेष भुङ्क्ते शुद्धान्तात्पूर्वं पश्चादपि प्रभुः ॥ १०.१॥ २५१॥

प्रणत त्रिदशेन्द्र मौलिमाला मकरन्दार्द्र पराग पङ्किलेन ।
अनुलिम्पति पादुके स्वयं त्वां अनुरूपेण पदेन रङ्गनाथः॥ १०.२॥ २५२॥

अवदात हिमांशु कानुषक्तं
पदरक्षे त्वयि रङ्गिणः कदाचित् ।
किमपि स्थित मद्वितीय माल्यं
विरलावस्थित मौक्तिकं स्मरामि ॥ १०.३॥ २५३॥

असहाय गृहीत रङ्गनाथां अवरोधाङ्गण सीम्नि पादुके त्वाम् ।
सुदृशः स्वय मर्चयन्ति दूरात् अवतंसोत्पल वासितै रपाङ्गैः॥ १०.४॥ २५४॥

निर्विश्यमान मपि नूतन सन्निवेशं
कैवल्य कल्पित विभूशण काय कान्तिम् ।
कालेषु निर्विशसि रङ्ग युवान मेका
शृङ्गार नित्य रसिकं मणिपादरक्षे ॥ १०.५॥ २५५॥

निद्रायितस्य कमितु र्मणिपादुके त्वं

पर्यङ्किका परिसरं प्रतिपद्यमाना ।
श्वासानिल प्रचलितेन भजस्य भीक्ष्णं
नाभी सरोज रजसा नवमङ्गरागम् ॥ १०.६॥ २५६॥

शयितवति रजन्यां पादुके रङ्गबन्धौ
चरण कमल पार्श्वे सादरं वर्तसे त्वम् ।
फणिपति शयनीया दुत्थितस्य प्रभाते
प्रथम नयन पातं पावनं प्राप्तुकामा ॥ १०.७॥ २५७॥

चरण कमल सङ्गा द्रङ्गनाथस्य नित्यं
निगम परिमलं त्वं पादुके निर्वमन्ती ।
नियत मतिशयाना वर्तसे सावरोधं
हृदय मधिवसन्तीं मालिकां वैजयन्तीम् ॥ १०.८॥ २५८॥

उपनिष दबलाभि र्नित्य मुत्तंसनीयं
किमपि जलधि कन्या हस्त संवाहनार्हम् ।
तव तु चरणरक्षे देवि लीलारविन्दं
चरण सरसिजं तच्चारु चाणूरहन्तुः ॥ १०.९॥ २५९॥

अखिलान्तः पुरवारेषु अनेकवारं पदावनि स्वैरम् ।
अनुभवति रङ्गनाथो विहार विक्रान्ति सहचरीं भवतीम् ॥ १०.१०॥ २६०॥

इति कवितार्किक सिंहस्य सर्वतन्त्र स्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य
श्रीमद्वेदान्ताचार्यस्य कृतिषु श्रीरङ्गनाथ पादुकासहस्रे
शृङ्गार पद्धति र्दशमी ॥